
वरूथिनी

[नाटिका]

रचयिता

कोलाचल यज्ञनारायण दीक्षितः

श्री गणेशाय नमः



वरूथिनी

[नाटिका]

'आन्ध्र कविता पितामह'

श्रीमदल्लसानि पेद्दनार्यप्रणीत

'स्वारोचिष मनुसम्भवानुसृता'

Presented by the author
To
Shri Satya Pal Verma
on 16th April 66.

रचयिता

कोलाचल यज्ञनारायण दीक्षितः

गुण्टूरुपुरी

१९६३

प्रथममुद्रणम्

५०० प्रतिकृतयः

शोभनशरद्राका

गुण्टूरुपुरी

पञ्चाक्षरी मुद्रणालयः

मूल्यम्

एकं रूप्यम्



वक्तारिका

रसिकाः पाठकाः !

आन्ध्रेषु साहितीसमाजे सर्वोऽपि सहृदयः मनुचरितस्य, अग्र-ताम्बूलं समर्पयति। अत्र कवि शिरीषकुसुमपेशलसुधामयोक्ति रससानि पेद्दनार्यः। कविरय 'मान्ध्रभोज' श्रीकृष्णदेवरायास्थान, अष्टदिग्गजकविषु यूथपइव मतः। कथामिमां मार्कण्डेयपुराणे संग्रहेण वर्तमानां कविरवि रयं स्वकविताप्रसुतानुगतया रीत्या तेजस्तिमिरा-विव नित्यविरुद्धयोः नीरागशृङ्गारयो स्संयोगं प्रकल्प्य अत्र प्रथमायैव शान्तमयाय रसाय प्राथम्यं दत्वा अग्निदेवसाक्षात्कार-पुरस्सरं साहित्यजगत् धवळयन् शाश्वतीं कीर्तिं समुपार्जितवान्। किं बहुना! आन्ध्रभूमौ यत्र रसिकरञ्जनी सभा प्रचलति तत्र वरूथिनीप्रवरयोः प्रणयगाथालहरी सभ्या नानन्दपरवशान् करोतीति अनुभव सिद्धम्।


अनयोरुभयोः (वरूथिनी प्रवरयोः) पुरोहितो भवति खलु, महौषधिविशेषप्रज्ञाशाली कोऽपि सिद्धसङ्कल्प स्सिद्धः। यथा, प्रवरं केनापि पादलेपव्याजेन हिमाचलं गमयित्वा तत्र सङ्कटे निपात्य अग्निदेवसाक्षात्कृतिं प्रकल्पितवान्; तथा, नरं प्रवरं वरूथिनी वृणोतीति मिषेण प्रवरभ्रुवेण सगन्धेन केनापि गन्धर्वेण संयोज्य तस्या अमानुषीत्वं च सार्थकं कृतवान्।

तामिमां कथां 'वरूथिनी' नाम्ना, आन्ध्रेतराणां पठने दर्शने अवकाशं चिकीर्षु र्नाटिका मिमा मरचयम्। नाटिकाया मस्यां नाटिकालक्षणं यथावसरमेव गृहीतम्।

केवलं नाटिकेयं मांग्लभाषाभिज्ञा नमरवाणीप्रिया नान्येत-रान् विशिष्य, विद्यार्थिनं उद्दिश्य सङ्कलिता यतोऽहं विद्यार्थी। यावत् मदीयरचनापाटव मतीत्य लभ्येत कोऽपि कवि स्ताव दियमेव हि पदे निवसति।

गर्तपुर्या मग्रहारे 'श्री रामचन्द्रपुराग्रहारसभा' इति काचिद्धर्मसंस्था अस्मत्पूर्विकैः वैदिकविद्याव्याप्तये स्थापिता वर्तते। सा खल्वस्याः वरूथिन्याः मुद्रा १णं दत्तवती। तत्सभासभ्यानां सर्वेषां कृतज्ञतापूर्वकवन्दनानि समर्पयामि। —रचयिता

'वरूथिनी' नाटिकाया मुद्रणे या रता सभा
जीयादाचन्द्रतारं सा कृति मुद्रा विधायिनी ॥



The author offering the dedication to Dr. Gopala Reddi, President, Andhra Sahitya Academy, Messrs Dikshitulu, Poet-laureate, Dr. Krishnacharya, Datruratna, K. V. Subbayya Choudari and Sri Kalluri Chandramouli, an embodiment of Indian culture, on the platform.



मान्यश्री वेजवाड गोपालरेड्डिभ्य आन्ध्रप्रदेशास्थानकवीश्वरैः
मध्वश्री काशी कृष्णाचार्यैः दत्तान्याशींषि ।

श्री वेजवाड कुलाम्बुधि
राका शीतांशु विम्ब ! गोपाल !
धन्यातिमान्यमान्या
कन्या काचित् 'वरूथिनी' नाम्नी ॥

आस्ते विवोढु कामा
त्वां तस्याः पाणिनाद्य पाणिं त्वम् ।
गृह्णीष्वाखिल भोगै
र्वर्धस्व च वर्धयस्व तेऽभिख्याम् ॥

काशी कृष्णाचार्यः
Poet Laureate.

कोलचल कुल दीपः दीक्षितोऽयं कवीन्द्रः
व्यरचय दतिरम्यं रूपकं सौरवाण्याम् ।
अनुपम रसगाधां पेद्दनार्यस्य वाणी
मनुपद मनुकृत्य व्याकरो त्साधुरीत्या ॥

गद्यं सुकुमार पदे
नारचय त्पद्यमपि प्रशस्तगुणम् ।
कल्पन मतिमृदु शय्या
साहित्य विकासि मृदु धारा ॥

आयु र्धन मारोग्यं
लभतां कवि रेष साधु साधुयुवा ।
भावि परिलब्ध समुचित
सामग्रीको रचयतु कृतीः ॥

कविसम्राट्
विश्वनाथ सत्यनारायणः, M. A.

श्रीमता दीक्षितेन प्राकाश्यमुन्नीता वरूथिनी सचेतस्सम्मोदाय भवत्विति चेतसा सम्भावयता मया संस्कृतहृदयेन नाट्यधर्मित्व मवलम्ब्याप्यामोद स्सूच्यमानः स्वस्पन्दसौन्दर्य मासूत्रयतु प्रधानकथागत मेकदेश मास्वादयितु मकृतयत्नानामपीदं रूपककल्प मामोदाय प्रकल्पयतु । आन्ध्रप्रबन्धगतं वस्तु संस्कृतगवीगतं संस्कृतचित्तैरास्वाद्यं भवत्विति रचयितुराकांक्षा भावुकै रभिनन्दनीया । संस्कृतवल्लभः श्रीगोपालः कृतिं भावयन् भावुकैरभिनन्दनीयचरितस्संवृत्तः । श्रीमान् दीक्षितः नवं नवं रचनाप्रगल्भः संस्कृते पुनर्नवतामायोजयितुं कृतदीक्ष इत्यात्मनि महान्मे आमोदः । अस्तु ।

दर्शनाचार्य, साहित्याचार्य, शास्त्रविशारद,
साहित्यसम्राट्, लाक्षणिकशिरोमणि, विद्याप्रवीण,
जम्मुलमडक माधवरामशर्मा,
अभिनवभारती



प्रवरगतमनस्का तत्समाकारगामि
न्यभव मिति विलक्षातीव लज्जाकुलाङ्गी ।
पुनरपि धृतवेषा दिव्ययोषा वरूथि
न्यधिगतनिज विद्वद्दीक्षिता मोमुदीतु ॥

तर्क व्याकरण वेदान्त पण्डितः
साहित्य विद्याप्रवीणः
मुळ्ळपूडि नारायण शास्त्री

Our culture has been sustained due to three causes i. e., Sanskrit, Sanyasi and Sahadharmini. Men in India have been swayed by diverse forces but the Sanskrit Language, its inherent strength, the selfless sacrifice of our revered Sanyasis who have worked throughout history to uphold the ancient glory and the patriotic ferver of our women to maintain the ancient dharma by the observance of its rules in all its orthodox fashion have been responsible to keep India in the world picture still. I wonder how many of our citizens realise the importance to be attached to these life giving forces. I have pleasure to add my meagre admiration and unstinted support to all movements that go to resuscitate the ancient glory, not as a revivalist movement, but to revitalise the same to suit modern trends and conditions. All glory therefore to Shri K.A.P.Y. Dixitulu for the effort he is making to bring out the best in the Sanskrit literature.

G. S. Melkot, M.P.,

Hyderabad.

जयतात् गोपालरेड्डिः

नेल्लाडा न्वयवार्धिपूर्णशशिनं
'गोपालरेड्डिं' मुदा
वेद्या मत्र वरूथिनी वरयते
दिव्याङ्गना कामना
सौजन्यातिशयान्विता बुधवरा
आशीर्भि रेतौ सदा
पूर्णायुःपरिपूर्णभोगपदवी-
पूर्णाभि राशास्तु ॥



संस्मृतिः

कोलाचलान्वयः कृष्णसोमयाजी पिता मम
संस्कृतान्ध्रांग्लभाषाज्ञः संस्कृते पत्रिकापतिः ॥

वन्दे तं संस्कृतार्थैकजननं जनकं सदा
यावज्जन्मव्रत श्चक्रे यो व्याप्तिं वेदशास्त्रयोः ॥

मल्लिनाथो मम भ्राता स्मर्तव्यो मे सुधी स्सदा
त्रिंशद्वर्षो भुवं त्यक्त्वा त्रिदशत्व मुपेयवान् ॥

भारतान्वय पूर्णेन्दुं नृसिंहाख्यं मृदुं प्रियम्
आचार्यं मम सुश्लोकं वन्दे वागीश्वरीसुतम् ॥

अभिवादनम्

वन्देऽहं 'मान्ध्रकवितापितामह' मनारतम्
श्रीकृष्णराय परिष दष्टदिग्गजयूथपम् ॥

श्री हयग्रीवाय नमः

भावुक हृदयम्

('वरूथिनी' मधिकृत्य किञ्चि निवेदनम्)

आन्ध्रवाङ्मये स्वारोचिष मनुसम्भवापर नामधेयं मनुचरित्र मत्युत्तमं स्थान मलङ्करोति । संस्कृत पञ्चकाव्येषु महाकवि कालिदास-कृतं रघुवंशमिव आन्ध्रपञ्चकाव्येष्विदं प्रथमं स्थान मधितिष्ठतीति विदितपूर्वमेव विपश्चिताम् । किमत्र कारणमिति जिज्ञासायां न किमपि; कवि कथा वस्तु परिग्रहीतॄणां वैशिष्ट्या दन्यत । तथाहि । अस्य कविः आन्ध्रकवितापितामहः शिरीष कुसुम पेशल सुधामयोक्तिः श्री पेद्द-नार्यः । अयं प्रभुणा श्रीकृष्णदेवरायेण 'कविगण्डपेण्डेर' बिरुदेन सम्मानितः पुराणागमेतिहासस्मृतियुतः प्रतिभावान् अष्टदिग्गजेष्वाद्यश्च 'अल्लसानिवानियल्लिकजिगिबिगि, 'पेद्दनवलेऽगृतिऽजेप्पिनऽवेद्दनवले' इत्यादी न्याभाणकान्यस्य कवे रचनावैदग्धीं, कविगणनायांच प्राथम्यं मथयति । कथावस्त्वपि सहृदयाकर्षकमेव । उक्तं चैतत् कविना स्वकण्ठ-रवेण 'मनुचरित्रं रससमञ्चितं श्राव्यं चतुर रचनानुकूलं कलिध्वंसक' मिति। सत्यमेवैतत् । अहो! वरूथिनी प्रणयगाथा कस्य वा रसिकस्य हृदयं न समावर्जयति? बत ! न कस्य विस्मयं जनयति श्रोत्रियप्रवरस्य प्रवरस्य वैराग्यम् ? अपिच पेद्दनार्यस्य, तथाविधविदग्धरचनायाः कोवा मुग्धो न भवति ? अत एव खलु कृतिपतिः श्रीकृष्णदेवरायः अस्य कवितामाधुर्य मामूलचूड मास्वाद्य तन्मयो भूत्वा कृतिग्रहण दिवसेऽस्य चतुरन्तयान मुद्धृतवान् निजपाणिना । किं बहुना ! आन्ध्र

भाषायां एतादृशं रसमयं काव्यं न भूतं न भविष्यतीत्यत्र न कोऽपि संशेते ।

वृद्धिकाम श्चिरञ्जीवी कोलाचल मल्लिनाथवंश्यो यज्ञनारायण दीक्षितनामाऽयं बालकविः एतल्लोकोत्तरप्रबन्धरसास्वादनभाग्य मांध्रेतराणामपि विदुषा मुत्पादयितुं औषधसिद्धागमनावधिं स्वरोचि जनन पर्यन्ता मेतदीयां कथां गैर्वाण्यां वाण्यां 'वरूथिनी' नाम्ना दृश्यप्रबन्ध मकरोदिति महत् प्रमोदस्थानम् अश्राविच मयैतत् दृश्यकाव्य मामूलाग्रं कवि मुखत एव। अस्मिन्नङ्का श्चत्वार इति कृत्वा इयं नाटिका भवितु मर्हति । प्रधानतः श्रव्यत्व दृश्यत्वयोरेव दत्तदृष्टिनापि कविना यथोचितं नाटकीयानि लक्षणान्यपि पर्यवेक्षितानीति वक्तुं प्रमोदेऽतितराम् । भाषाचास्यां नाटिकायां सलक्षणा मधुरा मृदुला च वर्तते । मध्ये मध्ये निबद्धा नातिविरळाः सरळा रसवन्तः श्लोका अपि रसिकमनांसि समावर्जयन्तो दृश्यन्ते । सर्वथेयं नाटिकाद्य प्रचाल्यमानानां नाटिकानां कस्मिन्नपि विषये किञ्चिदपि नो हीयत इत्यास्माकीनो निष्कृष्टोऽभिप्रायः । अयं चिरञ्जीवी श्रीयज्ञनारायण दीक्षितकवि रेवमेव स्वतन्त्राण्यपि काव्यानि बहूनि विरच्य गीर्वाणवाणी मतिशयेन अलङ्करोत्विति सादर माशासे ।

इत्थम्

गर्तपुरी
४-११-६३

महोपाध्याय, कविशेखर,
पळ्ळे पूर्णप्रज्ञाचार्यः

'अवधानिशिरोमणि,' 'विद्यावारिधि,' 'महामहोपाध्याय'
प्रभृति सार्थकानेकबिरुदाङ्कितानां,
आन्ध्रप्रदेश प्रभुत्वास्थान कविवर्याणां
सद्गश्री काशी कृष्णाचार्य महोदयानां

अभिनन्दनाशीः



श्लो ॥ श्रीकोलाचल सुस्विंश्य ! सुरवाग्दूरीकृते भारते ।
हृद्या मद्य 'वरूथिनीं' विरचयन्, तद्वाह्वयीं नाटिकाम् ।
गैर्वाणीपरिवर्धनोद्यमरते वृद्धस्य मेऽकल्पयः ।
पूर्णानन्दः मतोऽस्तु दीक्षित ! तवाप्यानन्दसम्पूर्णता ॥

गुण्टूरुपुरी
2-11-'68

काशी कृष्णाचार्यः
(Poet - Laureate)

A brief Synopsis of the play



"Manucharitra" narrates the interesting events leading to the birth of Swarochi, one of the Manus. It is a minor episode in 'Markandeya Purana.'

Allasani Peddana, hailed as 'Andhra Kavita Pitamaha' immortalised himself by weaving a full-fledged Prabandha around the slender episode in 'Markandeya Purana,' investing it with all the splendour of his magnificient Poetic imagination. Peddana was one of the eight gems that adorned the court of Sri Krishna Devaraya who was himself a poet and a great patron of literature. The poem was dedicated to the king as it was composed at the behest of Sri Krishna Devaraya who kindled the poet's imagination by throwing a hint that birth of Swarochi would provide a fitting theam, with his poetic style soft and sweet as the sirisha flower. Peddana composed 'Manucharitra' his master-piece which stands as a shining example of Prabandha poetry, a piece of resplendent poetic art which 'posterity will not willingly let die.'

This play endeavours to offer a dramatic presentation of the events culminating in the birth of the great hero, Swarochi.

The first act deals with the visit paid by a holy man (Siddha) to the residence of Pravarakhya, a pious brahmin endowed with captivating physical charm linked to unswerving moral fervour, living in the town of Arunaspada on the banks of Varuna. Pravarakhya yearns to visit all the sacred shrines and holy places of the land. The Siddha offers an ointment to Pravarakhya. By applying the ointment to the feet, Pravarakhya, gains the rare gift of flying through the air.

In the second act we find Pravarakhya in the Himalayas. The snow renders the ointment ineffective. He gropes for his way and comes face to face with Varudhini, a nymph of ravishing feminine grace. Pravarakhya requests her to show him the way to return to his home. But smitten by Pravarakhya's form, Varudhini exercises all her seductive charms. She distorts the holy texts as the devil quoting the scriptures and proclaims that pleasure is the highest aim of life. But Pravarakhya stands like a strong rock. unmoved by all the viles of Varudhini. Pushing her aside he goes away from the place of temptation,as a great champion of duty and a paragon of virtue. He prays to the God of fire, who rescues him and helps him to return to his native town Arunaspada.

The third act unfolds the pining away of love-lorn Varudhini. A subtle gandharva youth who had been rejected by Varudhini, now exploits the situation. Disguising himself as Pravarakhya he wins Varudhini's heart, spends a period of rare happiness in her company and leaves her when she becomes pregnant.

In the fourth act we find Varudhini delivering a male child in the ashrama of Jaimini who names the boy as 'Swarochi' because of his rare effulgence. The play concludes with the benediction uttered by Rambha that this hallowed land shall find rare felicity governed by Truth and Love.

—*Amarendra*





श्री कविताकलायै नमः

वरूथिनी

प्रथमोऽङ्कः

नान्दी

ब्रह्मा जगत्सृजति यन्नियमेन नित्यं
विष्णुश्च पालयति यन्नियमेन शश्वत् ।
रुद्रोऽपि नाशयति यन्नियमेन चैवं
दद्यात्स कालपुरुषप्रवर श्शुभं वः ॥

(तरुणाग्निहोत्रिणः प्रवरस्य गृहम् । मध्याह्नसमयः । प्रवरः निर्वर्तितनित्यकर्मानुष्ठानः समुपविष्टः, अतिथीन् निरीक्षमाणो रामायणपारायणं कुर्वन् तिष्ठति ।)

"तौ त माश्रम मासाद्य द्रुमै र्बहुभि रावृतम् ।
सुरम्य मभिवीक्षन्तौ शबरी मभ्युपेयतुः ॥
तौ च दृष्ट्वा तदा सिद्धा समुत्थाय कृताञ्जलिः ।
रामस्य पादौ जग्राह लक्ष्मणस्य च धीमतः ॥"

(ताव दागता गृहिणी)

गृहिणी :- आर्य ! पाक स्संवृत्तो वैश्वदेवाय

प्रवरः :- (क्षण मालोच्य)

अयि ! अद्यातिथीना मनागमो न मे रोचते। कञ्चित्कालं प्रतिपालयेम ।

गृहिणी :- तथैवास्तु । तावद् दहं तुलसी माराधयिष्यामि ।

(इति निर्याति)

प्रवरः :- (पारायणव्यग्रो भूत्वा पठति)

"पाद्य माचमनीयं च सर्वं प्रादा द्यथाविधि ।"

(किञ्चि दालोच्य)

'ता मुवाच ततो रामः श्रमणीं संश्रितव्रताम् '

(पारवश्यजाता न्यानन्दबाष्पाणि परिमृजन्)

"कच्चि त्ते निर्जिता विघ्नाः कच्चि त्ते वर्धते तपः ।

कच्चि त्ते नियतः क्रोध आहारश्च तपोधने !

कच्चि त्ते नियमाः प्राप्ताः कच्चि त्ते मनस स्सुखम् ।

कच्चि त्ते गुरुशुश्रूषा सफला चारुभाषिणि !

रामेण तापसी ....

(द्वारस्थः कोऽपि सिद्धः)

सिद्धः :- भो ब्राह्मण ! अद्य मह मभ्यागतोऽभ्यागतः ।

प्रवरः :- (तावत् पारायणं परिसमाप्य)

अये ! अतिथे रिव भाषितम् ।

गृहिणी :- तथैव । (द्वारमुपगच्छन्ती) इय मागच्छामि ।

(गत्वा द्वार मुद्घाट्य, अतिथिं दृष्ट्वा, अन्तरागत्य भर्तारं प्रति)

अतिथिरिव गौरीपतिरेवागतः ।

प्रवरः :- कि मतिथि रागतः ? कृतार्थोऽस्मि ।

गृहिणी :- अथ किम् ? व्याघ्रचर्मकिरीटः, ऐणेयमेखलः, कमण्डलुकरः, अघहरः साक्षाद्धर इव कोऽप्यतिथिविशेष आगत स्तिष्ठति द्वारे ।

प्रवरः :- अभिगम्यानेष्यामि ताव दाहर त्वं पाद्य मर्घ्यं च ।

(गृहिणी अन्तर्गता)

योगीश्वर ! कामकायन सगोत्रः प्रवरोऽहं भो अभिवादये ।

(साष्टाङ्गदण्डप्रणामं करोति)

सिद्धः :- आयुष्मान् भव । अभीष्टसिद्धि रस्तु ।

प्रवरः :- (अन्तरागच्छन्तु महान्तः)

सिद्धः :- अय मागच्छामि ।

(तावद् गृहिणी सकुशास्तरणं पीठ मानयति)

प्रवरः :- इद मासनम् अत्रोपविशन्तु ।

(इति गन्धाक्षतपुष्पै विंधिवत्पूजयति)

स्वामिन् ! इदं पादोदकम् ।

(स्वयं पादौ प्रक्षाळयति; गृहिणी जल मावर्जयति; प्रवरः पादोदकेन स्वशिर स्सम्मार्ज्य तस्या शिरश्च सम्मार्जयति)

(गृहिणी पूजापात्रं ददाति)

प्रवरः :- अनर्घातिथे ! इद मर्घ्यं गृहाण ।

सिद्धः :- तथैव (गृहीत्वा पद्मासने उपविशति ।

प्रवरः :- अद्य तत्रभवतां भवता मागमनेनात्मा मे कृतार्थः ।

सिद्धः :- अत एव खलु वत्स ! भवन्तं बुधविधेय मातिथेयं मत्वा, अत्रोपागतोऽस्मि ।

प्रवरः :- अनुगृहीतोऽस्मि ।

सिद्धः :- (मुहूर्तं तूष्णीं स्थित्वा)
आयुष्मन् ! बहुमुखेभ्यः श्रुतं ते चरितम् । जना स्त्वा मध्यापनतत्पर मम्बुरुहगर्भकुलाभरणं भणन्ति ।

प्रवरः :- वत्सलता मयि तेषां तथोक्तवादिनः करोति तान् ।

सिद्धः :- अपि कुशली भवान् ?

प्रवरः :- भगवदनुग्रहेण... विशिष्य अतिथिविशेषसमागमेन च ।

सिद्धः :- कच्चि दविच्छिन्नो हुताशन स्सेव्यते ?

प्रवरः :- सेव्यत एव; हव्यवाहनेनैव खलु देवताः प्रीयन्ते ।

सिद्धः :- युज्यते ।

प्रवरः :- स्वामिन् ! कापि जिज्ञासा ।

सिद्धः :- अलं मा मनात्मीयं मत्वा। स्वैरं पृच्छ ।

प्रवरः :- कुतो वा आगम्यते ? क्व वा गम्यते ? अतर्किताग मने नायं जनः कथं वा कृतार्थीकृतः ? ...... यतः

श्लो ॥ भवन्ति मन्त्रा भवतो वचांसि
न्यासप्रदेशोऽपि भवे त्प्रयागः ।
त्वत्पादपूतामलतोय मास्ते
मन्दाकिनीवाःपुनरुक्तभूतम् ॥

किञ्च

गार्हस्थ्यजम्बालतले निमग्नं,
गृहव्रतं मादृश मुद्धरे त्किम् ?
भवत्पदाब्जातपरागलेशा
दृते त्रिलोक्यामपि मौक्तिनाथ !

(इति तूष्णी मास्ते)

सिद्धः :- वत्स! गृहस्थो नाम - अङ्कस्थितार्थपेटी खल्वस्मादृशाम्....
यतः ।

श्लो ॥ गृही प्रपा स्या न्मरुदेशभागे
गृही बुभुक्षाहरणं च सस्यम् ।
गार्हस्थ्य माश्रित्य तथेतरे ते
सर्वाश्रमाः स्थैर्य महो लभन्ते ॥

अपि च

पङ्ग्वन्धभिक्षून् बधिरां स्तथान्यान्
वटू ननाथा नवधूतकादीन् ।
कापालिकान् बौद्धयतींश्च कोऽन्यः
पुष्णाति नित्यं नु ! विना गृहस्थम् ॥

प्रवरः :- उपपन्न मेवेदं गृहस्थानाम् (ऊर्ध्वं मवलोक्य)
मरीचिमाली नभोमध्य मधिवसति। अभ्यवहार स्सज्जो वर्तते। माध्याह्निक मनुतिष्ठन्तु ।

सिद्धः :- स्नात्वा क्षणेनै वागमिष्यामि; तावत् वैश्वदेवविधि माचरतु भवान् ।

प्रवरः :- तथैव स्वामिन् !

(उभावपि निष्क्रान्तौ)

इति प्रथमो रङ्गः

द्वितीयो रङ्गः

(उभावपि कृतभोजना वागत्य समुपविशतः । प्रवरः फलसहितताम्बूलं समर्पयति । सिद्ध स्ताम्बूलं निषिध्य फलं स्वीकरोति । प्रवरः पादयो रभिवादयति)

सिद्धः :- भगवान् बदरीनारायणोऽनुगृह्णातु त्वाम् ।

प्रवरः :- (उपविश्य सोत्कण्ठम्)
स्वामिन्! कथं बदरीनारायण इति। हिमवन्तं खल्वधिवसति भगवान्। किम् तीर्था न्यटित्वा समागता भवन्तः? भगवन्! केषु केषु तीर्थे ष्वमज्जन्? कांस्का नद्री नपश्यन्? ... द्वीपानि च कानि का न्यविशन्? सर्वं यथादृष्टं वर्णयन्तु तीर्थमाहात्म्यश्रवणकुतूहलि मे श्रवणयुगळम्-यतः ।

" तीर्थानि संसेवितु मप्यशक्तः
श्रृण्वन् हि माहात्म्य मघाच्च्युत स्स्यात् "

इत्यार्योक्ति मनुब्रवीमि ।

सिद्धः :- अयि तीर्थमाहात्म्यश्रवणकुतूहलिन्! श्रोतुं सज्जो भव कर्ण-रसायनं तीर्थानां माहात्म्यम् । केदारे नीलकण्ठ मभजम् । प्रयागे पद्माक्ष मपश्यम् । ततो बदर्यां नारायण मभ्यर्च्य, चतुरद्रिश्रृङ्गाणि चाध्यगच्छम् ।

प्रवरः :- स्वामिन् ! कथ मद्रीश्वरो हिमालयोऽधिगतः !

सिद्धः :- अथकिम् ? वत्स ! गृहस्थरत्न ! श्रुणु । लम्बमान रविरथ तुरङ्ग श्रृङ्गार चारु चामरच्छटा प्रेक्षण क्षणोद्ग्रीव चमर-समुदय सङ्कुला नुदयगिरि सानुविशेषान् वर्णयितुं कथं फणिराडपि प्रभवति ?

अहह! अन्धकरिपु कन्धरावास वासुकिवियोगभव दुर्व्यथा भोगभोगिनी भोगभाग परिवेष्टितपटीरविटपिवाटिका वेल्ल-देलालता वलयललितं मलयाद्रिशैत्य मनुभवैकवेद्यं खलु !

विकटकूटकोटि विटङ्कश्रृङ्गाटकाढौकमान जरदिन्दुबिम्ब गळदमृतबिन्दु दुर्दिनार्द्रीकृत सल्लकीपल्लवप्रभञ्जन पराञ्जन-हस्तिहस्त मस्ताद्रि मधिरुह्य तन्मणिवेदिकासु विश्रमितु मद्यापि मम मन आकांक्षतीव । आश्चर्यं माश्चर्यम् !

स्वस्वप्रवर्धित धरणीरुहसन्दोह दोहदप्रधानासमान खेल-दैलबिलविलासिनी विलासवाचालं तुलाकोटि कलकलाहू-

यमान मानसमदालसमराळे रजतशैले विहरामश्चे दपगत-संसृतिक्लेशा भवामः।

वत्स ! सतत मदजल स्रवणपरायणैरावण विषाण-कोटिसमुल्लिखित कटकपरिस्फुरत्कुरुविन्द कन्दलव्रात जाता-लात शङ्कापसर्पदभ्रमु भ्रमीावभ्रम धुरन्धर मेरुधराधरशिखर विहारकामो बहुजन्मकृत सुकृतपरिपाकवशवश्यो भवति।

(पूर्वस्मृत्या आनन्द मनुभवति)

प्रवर: :- (आत्मगतम्)

अमुना प्रसङ्गेनान्तरात्मा मे विहरतीव तेषु तेषु प्रदेशेषु (किञ्चिदि वालोच्य)

(प्रकाशम्)

भगवन्! भवोत्तीर्णा भवन्तः। अल्पेनापि वयसा पुण्यवशेन खलु, आसेतुहिमाचल मचरन्...(सखेदम्) धृतपक्षा वयं तु, बहुना कालेनापि न प्रभवेम, एकामप्याशा मालोकयितु मिति क्लिश्यामि स्वामिन् !

सिद्ध: :- अलं मा मनात्मीयं मत्वा। वयं सिद्धसङ्कल्पा स्सिद्धाः। जरारुजेऽस्मान् न ग्रसेताम्। लब्धेश्वरानुग्रहा वयं महता प्रभावेण पवमानमानस तिरस्कारि त्वराहंकृत्या विहरामः। दिवि बिसरुह बान्धव सैन्धव सङ्घ इव, भुवि दूरस्थान मपि विना ठवठवं यदृच्छया विचरामश्च।

प्रवरः :- मुनिलोकग्रामणीः ! भगवत्कथाश्रवणेन महापुरुष समागमेन च कौतुकभरव्यग्रान्तरङ्गो भक्ति निबद्धाञ्जलि बन्धुरो विज्ञापयामि "शिष्य मिमं तीर्थयात्रा नयनानुग्रहदानेन, अनुगृह्णन्तु भवन्त" इति ।

सिद्धः :- अन्तेवासी भव (दन्त्यमञ्जूषां गृह्णन्) प्रसारय पादौ ।

प्रवरः :- (पादप्रसारः किमर्थं वेति सन्दिहानः प्रसारयति)

सिद्धः :- (तावत् दीर्घवल्ली पेटीतः कमपि पादलेपं गृह्णन् प्रवर पादयो र्विलेप्तुं यतते ।)

प्रवरः :- (निवार्य पादौ सङ्कोचयन्) महात्मन् ! वृद्धिकामाना मस्मादृशां चरणा वस्पृश्यौ ।

सिद्धः :- भवतु, वय मतीत्य वर्तेमहि विषयान् ।

प्रवरः :- हस्ते निक्षिपन्तु; श्वः प्रात रग्निसेवानन्तरम् ...

सिद्धः :- यथा ते रोचते । (नेत्रे निमील्य क्षणं ध्यात्वा पुन रुन्मील्य, विनूत्न मल्पकं दीर्घवल्लीपेटं गृहीत्वा, तस्मिन् पादलेपं निक्षिप्य इतस्ततोऽवलोक्य प्रवरहस्ते निक्षिपति ।)

प्रवरः :- (हस्ताभ्यां गृहीत्वा नमस्कृत्य) अत्यन्त मनुगृहीतोऽस्मि ।

सिद्धः :- मनोवाञ्छाफलसिद्धि रस्तु । वत्स ! साधयिष्यामः ।

प्रवरः :- बाढम् । अनुगृह्णन्तु पुनर्दर्शनाय ।

सिद्धः :- जय शङ्कर ! (इत्युत्थाय गच्छन् एवं गायति)

जय शङ्कर ! जय शङ्कर ! जय शङ्कर ! गिरिजेश !
शिव! शङ्कर ! शिव! शङ्कर ! शिव ! शङ्कर! नगजेश!
विधुशेखर ! विधुशेखर ! विधुशेखर ! परमेश !
शशिभूषण ! शशिभूषण ! शशिभूषण ! जगदीश !

प्रवरः :- (कतिचित्पदा न्यनुगम्य नमस्करोति ।)

सिद्धः :- दूर मागतोऽसि; वत्स ! निवर्तस्व ।

प्रवरः :- (निवृत्तः) इदानीं क्व गमिष्यामि ? उदयाचलं प्रयास्यामि वा! अथवा मलयाद्रि मधिरोहिष्यामि । (किञ्चिदिवालोच्य) अस्तु बदरीनारायणं द्रक्ष्यामि। सिद्धोऽप्यद्रीश्वरमहिमान ममितं वर्णितवान्। श्वः प्रात रग्निसेवानन्तरं पर्वतराजं हिमवन्तमेवाधिगमिष्यामि। तुहिनभूधरशृङ्गे श्यामलकोमलकानन हेम व्य दरीझरीनिरीक्षापेक्षा च सफला भविष्यति ।

गृहिणी :- (प्रविश्य) आर्य! सवन वह्नाविन्धन निक्षेपण समयः

प्रवरः :- आगच्छामि-आगच्छामि

(अन्तर्गच्छति - यवनिका पतति)

इति प्रथमोऽङ्कः

द्वितीयोऽङ्कः

प्रवरः :- (हिमाचलशिखरे इतस्ततश्चर न्नाश्चर्य मभिनयन्...)
हन्त! निमेषान्तरेणै वाधिगतोऽस्मि खलु पर्वतराजस्य हिमालयस्य शिखरम्! । (आकाश मवलोक्य साश्चर्य) अद्रि रयं समुन्नतैः शृङ्गै रभ्र कषतीव । (कतिचित्पदानि गत्वा) इमानि झरीपटला न्यभङ्गतरङ्गमृदङ्गनिस्वनै र्विकसितपिञ्छानां मयूराणां नटनानुकूलानि भवन्ति खलु । (द्वित्राणि पदानि गत्वा चिह्न मवलोक्य नासिकायां तर्जनीं निक्षिप्य) चन्द्रशेखरं कामयमाना हैमवती तं देवदेव मत्रैव खलूपचरितवती । (क्षणं ध्यात्वा गच्छन्) कथं कथम्! तदा क्रुद्धः फालाक्षो मन्मथं भस्मावशेषं कृतवान्वाऽत्र ? (चिन्तावनतवदनो गच्छन् सविस्मयम्) अहो ! इहैव सेताश्रय स्सप्तर्षिधर्मपत्नी र्मोहयित्वा विरह मन्वभवन् वा ! (इतस्तत श्चरन् केनापि पथा कतिचित्पदानि गत्वा) प्रमथाधिपतिः परमशिवः पर्वतराजपुत्रीं गौरीं परिणीतवा नत्र...... धन्योऽसि धरणीधरराज! (स्थलान्तरं गत्वा) हे सुरराज ! शचीं जलकेलि मभ्यासयन्नत्र सुरापगायां जलविहारलालसोऽमूः खलु ! किं बहुना ! देवसभा यज्ञाङ्गसद्द्रव्यसमृद्धियुक्तेऽस्मिन्नचले हवींषि सम्भुज्य जिह्वाऽरुचि मपाकरोति खलु ! (इति किञ्चिद्दूरं गत्वा

चूत्कारध्वनिं श्रुत्वा गगनमवलोक्य) कथं नभोमध्य मधिरूढो भगवान् भानुमान् ! ...... अत्र द्रष्टव्या विशेषा अनन्ता वर्तन्ते । भवतु, श्वः पुन रागत्य सावकाशं द्रक्ष्यामि । (नेत्रे निमील्य ध्यान मास्थितः) क्षणमात्रेण गृहे भवितव्यं मया । (पुन र्नेत्रे समुन्मील्य सविस्मयम्) कथ मत्रैव तिष्ठामि ! (पादौ विलोक्य) बत ! बत ! हिमरसेन प्रक्षाळितलेपौ मे चरणौ ! हा धिक् ! उड्डयितुं शक्तिहीनोऽस्मि संवृत्तः । (क्षण मालोच्य हस्तं हृदये कृत्वा)अनन्तःख ल्वयं पर्वतराजः! केन पथा पुन र्निर्गमिष्यामि ? क्वास्मदरुणास्पदपुरी ? क्वायं तुहिनाचलः! अकलङ्कौषधसत्वानुभवाय विहायान्यानि द्वारकावन्तिका कुरुक्षेत्र काशी गया प्रयागादीनि पुण्यक्षेत्राणि कथ मिमं तुहिनाचल मध्यगच्छम्! बुद्धिजाड्यजनितोन्मादाः खलु श्रोत्रियाः नाम(किञ्चिद्दूरं गत्वा, निपुणं विलोक्य) तत्र भवनमिव!......तत्रैव गमिष्यामि (कतिचित्पदानि गत्वा भवन मवलोकयन्) अहो ! एतद्भवननिर्माणनैपुण्यं शिल्पिनः स्थाने खलु ! (श्रुति मभिनीय) कथ मत्र वीणानिक्वाणः श्रूयते। प्राङ्गणं प्रवेक्ष्यामि (अन्तः प्रविशति। देवकान्ता वरूथिनी गायति वीणां वादयन्ती)

प्रियसख ! छलयसि वा- अहह कान्त !
स्वीकुरु गायनीं-वीणावादिनीम्
रतिसुख मनुभव; परिभव मन्मथम्

जन्मफलं ननु भवति वयस्य!
विरहोत्कण्ठित - ललनासेवनम्
नूपुरमञ्जुल - शिञ्जित कलकले
माराकार! जय सङ्गम सङ्गरे
प्रियसख! छलयसि वा -

(हठात् शिर उन्नमय्य प्रवर मवलोक्य सभ्रूभङ्गं सानन्दम्) कथ मय मम्बरा दवतीर्णो नलकूबरः! आहोस्वित् वञ्चकः पञ्चशरः किं मां वञ्चयति? (सविलास मुत्तिष्ठन्ती...आत्मगतम्) निरन्तरं पश्यामः खलु! सुर गरुडोरग नर खेचर किन्नर सिद्ध साध्य चारण विद्याधर गन्धर्व कुमारकान्! अनेन तेष्वेकोऽपि नैव सदृशायते। कथम्... मीनकेतनो धनुष्टङ्कारै मां त्रासयतीव,

प्रवरः :- (सविस्मयं पश्यन्...आत्मनि) कास्वि दियम्? का वा भवतु, अनया निर्दिष्टपुरमार्गो गृहं गमिष्यामि (सविनयम्... प्रकाशम्) अयि भीतहरिणेक्षणे! का त्व मसि? किं मत्र विजने वर्तसे? भूसुरोऽहं। जनाः मां प्रवराख्यं वदन्ति। अस्मदीय स्यारुणास्पदपुरस्य मार्गं न जानामि। कृपया निर्दिश पन्थानम्। शुभं ते भूयात्।

वरू :- (साट्टहासं किञ्चिद्दूरं गत्वा कमपि तरुणं पूगतरु माश्रिता साभिनयम्...) अंहो! ब्राह्मण! एतावती विशाले खलु

ते लोचने!। कथ मागतं पन्थानमपि न जानासि ? व्याजोऽय मेकान्ते युवती रालापयितुम् । हन्त! लघुतरा वयं ते स्मः । श्रुणु तावत्, अस्माकं सहोदरी सुधाब्धिकन्यका ।...अस्मद्गान्धर्वविद्यया शिलाश्च द्रवन्ति । आस्माकीना कलाशास्त्रावृत्तिः स्तन्ये नाभ्यस्ता । हयमेध राजसूयाध्वर सम्बन्धीनि सवन तंत्राणि अस्मदुपलम्भकानि शुल्कानि ।(हस्तेन दर्शयन्ती) वय मत्र कनकनगसीम्नि कल्पतरुच्छाया स्विन्द्रकसमां कुर्मः । पद्मसम्भववैकुण्ठमर्गसभा अस्माकं व्यायामकलाप्रदर्शनशालाः विप्रकुमार ! नाम्ना मां वरूथिनीं विद्धि । उदारगुणाढ्या स्तिलोत्तमा हरिणी हेमा रम्भा शशिरेखाद्या मदीयाः प्राणसख्यः ।

अनन्त रत्न द्युति मेदुरान्त
र्दर्यन्तरीपे मिहिकाचलेऽस्मिन् ।
वसुन्धरादेव कुलावतंस !
रमामहे रम्य वनी तलेषू ॥
मन्दाकिनी शीतलगन्धवाह
चल त्प्रफुल्लोज्ज्वल मञ्जरीषु ।
गन्धोत्सुकेन्दिन्दिरतुन्दिलं मे
कान्तारसन्तान मिदं मनोज्ञम् ॥

प्रवरः :- किं मय मुपदेशः...मानिनि !

वरू :- न तथा; अथ मादेश: ।

त्वं केवलं कैतवपुष्पवाणः
त्वमेव बन्धुर्नितरां ममास्तः ।
आतिथ्य मङ्गीकुरु भूसुराग्रय !
वसात्र माणिक्यमये गृहे मे ॥

प्रवरः :- लब्धा स्सपर्या स्तव हंसयाने !
न चात्र वासो, गमनं ममेष्टम् ।
अनागतं चागतमेव मत्वा
पुरस्य मार्गं वद वैदिकोऽहम् ॥

वरू :- पुरं पुर मित्युत्स्वनायसे किम् ? किमस्ति ते कुटीरनिलयेषु ? पश्यात्र रत्नकन्दरीः। जिघ्र, इमं चन्दनगन्धम् । विहरात्र गङ्गासैकते । तरुणाग्निहोत्रिन्! वस, अस्मिन्नेव लवलीनिकुञ्जे ।

वदामि सत्यं न च गोपयामि
तवास्त्यधीनं मम चित्त मेतत् ।
मा मर्पयेः किं मदनाय ? नोचेत्
सम्भावयेर्वा परिरभ्य गाढम् ॥

प्रवरः :- (कर्णौ पिधाय) शान्तं पापम् । अलमल मयुक्त स्याभिधानेन। अहं तु विप्रः, व्रती, आहिताग्निश्च । व्रतोपवासै र्दिवसान् नयामि ।

न यामि चेदद्य गृहा न्मदीयान् ,
सम्फुल्लनीरेरुहपत्रनेत्रे !
नष्टा भवेयुर्हि ममाहिताग्नेः
धर्मास्समस्ता, बहुभिः किमुक्तैः ?

वैश्वदेव मन्त्रशिष्टम् । भुक्तिवेळा चात्येति । वृद्धौ पितरौ, अतिथय स्सर्वे मदागमनं निरीक्षन्ते ।... (सप्रार्थनम्)
तल्लि ! पन्थानं निर्दिश ।

वरू :- मावजरूप ! भवान् सोमयाजी ननु ?

भोगान् कदात्राऽनुभविष्यसि त्व
माख्याहि गोत्रामरचक्रवर्तिन् !
यज्ञैरनन्तैर्यजतां फलं हि
*स्या दस्मदालिङ्गन सौख्यमेव ॥

सावधानचित्तो भव ।

कल्पद्रु दत्तांशुक चित्रपुष्प
फलासवामेय सुरत्न भूषाः ।
संसेवमानोऽनुदिनं मया त्वं
रमस्व भोगैकपरायणस्सन् ॥

---

*यज्ञेष्वकार्षीः खलु सोमपानम् ।
कुमस्व बिम्बाऽधरपान मत्र ॥

ब्रह्मवादिन् !

अन्ध श्चन्द्रिकामिव, दिवा दिवान्ध इव, उपागतां गन्धर्वाङ्गना मननुभवन् किंवा भणसि ? ... ... एवं कुरु ।

(वीणां गृह्णन्ती)

गेयम् ॥ धरणिसुरराज ! समुदारगुण ! मां सुखय ।
सरसवचनै वितर साधु भुजबन्धम् ।
सरस ! समुपेहि रतिसार मधरं प्रदिश
विरचय सराग मतिवेलरतिसौख्यम् ॥

(वीणां निक्षिपति)

प्रवरः :- किमेतत् ? अह मरुणास्पदपुरस्य मार्गं दिक्मात्रं पृच्छामि ।

वरू :- प्राणसख ! अहमप्यनङ्गनगरस्य मार्गं दिक्मात्रमेव सूचयामि । इक्षुशरासन सायक व्यथा खिन्न पाण्डुर कपोलानां प्रियविरहान्तर्गतार्थदृष्टीनां, कामिनीनां परीरम्भाः जन्मान्तरकृत सुकृत परिपाकवशवश्या भवन्ति हि । महीसुरकुमार ! सन्निहितं सशरीर स्वर्गसुख मपाकृत्य इन्द्रियनिरोधने किं कौशल मस्ति?

प्रवरः :-सर्वोऽप्ययं कामुकविषयः । (सोद्वेगम्) यदि जानासि नगरमार्ग मावेद्य पुण्यं लभस्व । द्विजः लौल्यात् जिह्माचरणेन ब्रह्मानन्दाधिराज्यपदव्या श्च्युतो भवति ।

वरू :- नहि नहि । यत्र मनः कुम्भगतज्योतिरिव निश्चलं भवेत्, यस्मिन्निन्द्रियाणि च सुखं लभेरन् तदेव खलु परब्रह्म "आनन्दो ब्रह्म" इत्यस्या श्श्रुते रर्थं भावय ।

प्रवर: :- (निस्पृहं हसित्वा)

तवैव युक्ता खलु पाण्डितीय
मुच्चैरुपाध्याय्यसि कामशास्त्रे
अहो ! त्रयीधर्मविधिं च पाप
फलं, रतिं पुण्यफलां ब्रवीपि ॥

तरुणि ! श्रृणु । नित्यं हव्यैस्तृप्तो वह्नि र्यत्सुख मस्मभ्यं ददाति, तत् त्वं न जानीषे ।

यथा हि दर्भारणिवीतिहोत्रा
मम प्रियास्स्यु र्न तथेतरे ये ।
स्थिरं शरीरं किमु ? तुच्छसौख्या
न्येतानि हि श्मश्रुमधूपमानि ।

वरू :- (नितरां सन्निधत्ते) अलमल मतिभाषितेन । भूसुरराज ! ... स्वभावतः पुरुषा मायाशीलाः । "स्वयंवरा या वनिता पुमांस माप्नोति लोके लघुता मतीव" इत्यार्योक्तिर्यथार्था खलु ! विप्र ! त्वामेव कामये, त्वमेव मे प्राणेभ्योऽपि प्रियं मित्रम् !

(अत्यन्तं सन्निदधाति)

प्रवर: :- (पश्चाद्गच्छन्) मा मा; सदृशं नेदम् ।

वरू :- (गद्गदकण्ठी) मन्मथमन्मथ ! इयं गाढमालिङ्गामि, दीयता मधर: (गाढमालिङ्गति)





After persistent rejections by Pravarakhya, the nymph, Varudhini makes the final bid to trap him in the meshes of seductive charms.

प्रवरः- हा हा श्रीहरे ! अनार्यं संवृत्तम् (मुखं परावृत्य) धिक् ! अनार्ये ! मे मनः परस्त्रीविमुखम् । (ता मपक्षिपति)

वरू:-कूपारहितात्मक! अपक्षेप मबला न सहन्ते । पश्यात्र ममांसयोरथः ते नखक्षतानि । (कलस्वनेन रुदन्ती) दयाविहीन ! यज्ञै रिष्टं, तप स्तप्तं, हुत मग्नाविति किंवा किंवा विकत्थसे । कूपारहितात्मकेन त्वया कृतैः किं फलं? दयार्द्रबुद्धेरेव सद्गति स्सुलभा भवतीति वदन्ति हि वेत्तारः ! कि मेतदपि न जानासि ? निष्फलास्ते विद्याः । अहो धिक् ! किं पराशरो दाशकन्या रिरंसु र्ब्राह्मणैर्बहिष्कृतः ? उत ... गाधेयस्य मेनकासम्बन्धोऽनाभिजात्य मवहत् ? अहो ! देवदासीसहवासेनापगतप्रभावो मान्दकर्णिः ? अद्यापि देवराजः खलु ...अहल्यायै जारः । किं त्व मेतेभ्योऽप्यधिकोऽसि ? पवनपर्णाम्बुभक्षका स्संयमितेन्द्रियव्यापारा स्सर्वेऽपि मुनय स्तामरसनेत्राणा मगारेषु... अथवा तदङ्गणेषु बन्दीभवन्ति खलु !

प्रवरः :- किं ते शुष्कवादेन ? (दूरतो गत्वा) (आत्मगतम्) हा ! कष्टमिदानीम् । किं करोमि ? कं पृच्छामि ? का गतिः ? भवतु, सर्वकामदमग्निदेवमेव शरणं प्रपद्ये । (इति उपस्पृश्य शुचिः) भगवन् ! गार्हपत्याग्ने ! क्रतुभुजां त्वमसि हव्यवाहः । श्रुतय स्त्वां प्रत्यक्षदैवमिति स्तुवन्ति । समस्तजगदन्तर्यामी भवान् । स्वामिन् ! क्रतूत्सवसन्धायक ! स्वाहावधूवल्लभ !

भवामि चे द्दानजपाग्निहोत्र
परो भवद्ध्यानपरायणश्च ।
नाहं यदीप्सु ह्रृदयेऽन्यदार-
वित्तादि वह्ने ! नियतो यदि स्याम् ॥
यावद्रविः पश्चिमवारिराशौ
मग्नोऽस्त माप्नोति न तावदेव ।
सम्मानवात्सल्यमुखेन भक्तम्
क्षणाद् गृहे पातय मां कृशानो !

(तावदागते हरिणी शशिरेखे दूरतः पश्यतः प्रवरं वरूथिनीं च) (तावदग्निदेवाविर्भावेन स प्रदेशो धगद्धगितो भवति । यवनिकापार्श्वतः अश्वखुरन्यासशब्दश्च श्रूयते)

प्रवरः :- (नमस्कुर्वन् भक्तिप्रपूर्णचित्त स्तिष्ठति । तावत्, प्रत्यक्षीभूतो धूमध्वजः)

अग्निदेवः :- वत्स! स्वस्ति तेऽस्तु । अय मश्वराजः। अधिष्ठीयताम् ।

प्रवरः :- भगवन् ! अग्निदेव ! धन्योऽस्मि । अनुगृहीतोऽस्मि । (ततोऽन्तर्गच्छति । अश्वस्य, उड्डयनध्वनि र्जायते ।)

वरू :- हा धिक ! हा धिक् ! गतएव सुकुमारमूर्तिः ... (पूगतरुमाश्रित्य निश्चेष्टा भवति । हरिणीशशिरेखे धावन्त्या वागत्य हस्तै र्गृहीत्वान्तर्नयतः । (यवनिका पतति)

इति द्वितीयोऽङ्कः

तृतीयोऽङ्कः

(वरूथिनी, निज भवन कासार सन्निकृष्टे चन्द्रशिला कल्पित कायमाने सुम दळ परिपुष्ट शयने शयाना, इतस्ततः परिलुठन्ती शेते । हरिणीशशिरेखे वीजयतो मयूरपिण्छ वीजनेन ।)

वरू :- हा धिक् ! हा धिक् ! स खलु दया विहीनो भूमिसुर-नन्दनो मदीयं प्रणयं कदर्थीकृत्य गतः । हतविधे ! कथ मिमं वियोगसागरं तरामि । .... (क्षणं निश्वस्य) काऽहं मन्दभाग्या ! क च तत्समालिङ्गनसुखम् !

शशि:-(हरिणीं प्रति)हला हरिणि! इयं खल्वतिकष्टां दशा मनुभवति ।

हरिणी :- सखि ! समाश्वसिहि । समाश्वसिहि ।

शशि :- कथं वा समाश्वसिति सखी सुखोपनते मनोहरे प्रभ्रष्टे बाहु बन्धात् ?......

वरू :- शृणु मद्वचनम् । तस्याः सौन्दर्य मपरिपुष्ट मेव, तस्या यौवन मयौगिकमेव, या यूना सुन्दरेण प्राणनायकेन न युज्यते । अत एव खलु मर्त्य मामिनीनां जन्म सार्थकं भवति - याः, ईष दवज्ञयाऽपि कान्तकृतया देहं त्यक्तुं शक्नुवन्ति ।

(तावत् गन्धमादन पुण्डरीकाख्यौ किंपुरुष कुमारौ देवभूमौ तस्यां तत्तद्विशेषा नवलोकयन्तौ जलाशय मन्वेष्टारा वितस्ततः अटन्तौ तत्र वरूथिनी भवन निकटस्थं कासारं प्राप्नुवतः)

गन्धमादनः :- पुण्डरीक ! पश्य, तदत्र कन्दरे मणिदीप कान्ति र्दिनमणे रपि दीधिती स्समाच्छादयति ।

पुण्डरीकः :- अथ किम् ! देवभूमयः खल्विमाः ।

गन्ध :- युज्यते । अत्रवसता मलभ्यमित्यभाव्यं खलु !

पुण्ड :-भवतु, भवतु, त्वया वर्णित इव भगवान् भानुमा नस्त मेति । प्रक्षाळ्य हस्तपादम् (पार्श्वतः पाद प्रक्षाळन ध्वनिः भवति) (हरिणी शशिरेखे केषांचि दागतिं मन्वाने इतस्ततोऽव लोकयतः, न पश्यतश्च कमपि तत्र)

ह :- कथं ? मर्त्यालाप इव !

श :- मर्त्या वा ... अमर्त्या वा ?

वरू :- (तयोः किंपुरुष कुमारयो स्सल्लापं श्रुतवती सती) हरिणि! अत्र वसता मलभ्य मभाव्य मिति...विरुध्यते खलु! (बाधां नाटयति)

हरिणी :- (शशिरेखां प्रति) हला ! शशिरेखे ! शिशिरोपचारै रेना मुपचरावः; तदनुपालयाप्रमत्ता; यावत् बिसिनी चन्द्रशालात उपचार वस्तू न्यानेष्यामि ।

ह :- बाढम् त्वरित मागच्छ ।

श :- तथैव । (सा गच्छति) (तावत् वरूथिनी शयना दुत्तिष्ठति)

ह :- सखि ! स्वपिहि । आर्द्रवातान् सञ्चारयामि ।

वरू :- हा ! पञ्चबाण ! दर्शय दयाम् । (मोह मुपयाति)

शशिरेखा :- (बोधयित्वा, मोहं गतां मत्वा)

कथ मद्यापि हरिणी नैवाऽयाति । तदुपचार सामग्री तत्राऽस्ति वा ? नवा ? .... भवतु, तावत् लवली निकुञ्जात् हल्लक मानीय वीजयिष्यामि । (द्वित्राणि पदानि गत्वा " कथमस्तिवा ?" इति पुनस्ता मवलोक्य गच्छति)...

(भिन्न प्रदेशयो रुपविश्य सन्ध्या मुपासितोः गन्धमाधन पुण्डरीकयोः कासार तलोपविष्टः पुण्डरीकः सन्ध्यान्ते)

पुण्ड :- "प्रवर" अन्वितः (आत्मनि) पुण्डरीक शर्मा, अहं भो अभिवादये ।

वरू :-(मोह मुपगतापि 'प्रवर' इति नाम श्रवणेन विगतमूर्छा, हठा दुत्थाय समुपविश्य, उन्मीलित नयना बाहू प्रसार्य दिशः पश्यन्ती, प्रिय मपश्यन्ती ।)

कासौ मे प्राणसखः ? प्राणसख ! निकट मागच्छ। निभृत मुपगूहस्व (पुनर्मोह मुपयाति । ताव न्निर्वर्तितानुष्ठानौ गन्ध-मादन पुण्डरीकौ गारुडोत्कीर्णकुड्य तद्भवनं "कस्य वा" इति संशयितारौ तत्रैव समागच्छतः । एतदन्तरे शशिरेखा वरूथिनीभाषितेन द्रुत मागत्य हल्लकेन वीजयन्ती तिष्ठति)

गन्ध :- आर्ये ! कावेयम् ?

शशि :- अस्मत्प्रियसखी वरूथिनी ।

गन्ध :- कि मस्वस्था ?

शशि :- वञ्चिता केनापि ब्राह्मणब्रुवेण ।

पुण्ड :- किं नामधेय स्सः ?

शशि :- स्वयं किल प्रवरनामानं कमपि भूमिसुरनन्दनं कामित वती......

पुण्ड :- ततस्ततः ।

शशि :- स किल, एनां धर्मध्वजी तिरश्चकार।

गन्ध :- (पुण्डरीकं प्रति) अहो ! निष्पन्दता वर्माराधने ।
(तत शिशशिरोपचार चिकीर्षया तत्तदुपकरणानि जलार्द्रानि कर्तुं पार्श्वतो गच्छति शशिरेखा)

गन्ध :- (पुण्डरीकं प्रति जनान्तिकम्) अन्वेष्टव्यं पादलंभ मिव ।

पुण्ड :- अस्मत् प्रभु श्शुभोदर्कोपेत स्सर्वथा ।

गन्ध :- " सर्वदा " इति च भण । अनया तिरस्कृतोऽपि पुरस्करो-स्येवास्या रूपम् । प्रभुणा स्वकण्ठरवेणाविष्कृतम् । ......
सौन्दर्येण अन्यनिरोधिनी किलेयं वरूथिनी । किम्बहुना !
विनाऽनया गन्धर्व राजत्व मेवाप्रतिष्ठितं किल !

पुण्ड :- तदागच्छ प्रभो रनुग्रह सम्पादनाय । ......
(ताव दागच्छति, उपकरण हस्ता शशिरेखा) (प्रकाशं)
अचिरेणैव देव मनुकूलयिष्यति ।

शशि :- भवादृशां गी रवितथा खलु !

(गन्धमादन पुण्डरीकौ निर्गच्छतः)

शशि :- (उपचरन्ती ... -- आत्मगतम्) इतः पूर्वमनया किमपि संलपित मिव। किमुत्स्वप्नायमाना वा ! ... किं वा भवतु। (तत शिशशिरोपचारै स्तां बाधयति। वरूथिनी च विगतमूर्छा भवति। ताव द्धरिणी प्रविशति। (हरिणीं प्रति) हला ! इय मुत्स्वप्नायते ।

हरिणी :- युज्यते। जागरदुर्लभ मभीष्टं स्वप्नेऽनुभूयत इति।... सखि ! उपविश; उशीरानुलेपेनानेन, अङ्गानि विलिप्य, आर्द्रवातान् सञ्चारयामि। (तथा कृत्वा प्रतिबुद्धां तां प्रति) किं प्रतीकार स्तापोपशमनाय प्रभवति ?

वरू :- इष्टजनाचरितं किमपि सुखायते हि !

शशि :- (गगन मवलोक्य) हन्त! दिनमणिः कषायदीधिति र्भवति।

हरि :- विविच्य ब्रूहि।

शशि :- पश्य हरिणि! अतिदारुण पुष्पशिलीमुख व्यथाभर विवशाङ्गी मङ्गना मङ्गभवायार्पयित्वा गत स्स क्रूरो महीसुराधम इति...

हरि :- अल मल मतिविस्तरेण। अहह! हला! वरूथिनि! पश्य मनोहरं दृश्यम्। किमियं रविबिम्ब पतन दीर्ण पयोधि गर्भ निर्गतस्य शेषफणिनः फणारत्नरुचिः ? उत दिवसावसाने सन्दीप्तास्तगिरि शिखायाः ज्योतिर्लता प्रतानातपः ? ...

(ततो रम्भातिलोत्तमे प्रविशतः)

तिलो :- सखि हरिणि ! कवयसीव ।

हरि :- आम् । एतावत् कवयामि; इदानीं यामि च ।

रम्भा :- किं निमित्तम् ?

ह :- सख्या अवस्थां दोषाकराय निवेदयितुम् ।

वरू :- तिलोत्तमे ! पश्य मधुर दर्शनं तन्मिथुनम् । व्रतानुरूप फला खलु सा, अङ्गना । (किञ्चि द्विचार्य) हला ! दुःखशीला खल्वह मस्मि । क्षण मप्यत्र न भवामि । तदाराममेव व्रजामः ।

तिलो :- सखि ! समाश्वसिहि समाश्वसिहि । (तावदेव वरूथिनी सुम शयना दुत्तिष्ठति ।)

रम्भा :- (सरोषम्) हन्त ! उत्थितैव । (वरूथिनीं प्रति) अयि ! असहने ! तिष्ठ मामवलम्ब्य । अवकुण्ठनवती भव (तथा कृत्वा कम्पमानावयवा वरूथिनी शशिरेखा मवलम्बते)

रम्भा :- (सासूयम्) अप्सरःकुलस्याननुरूपा खल्वियं पद्धतिः । एवं सति न त्वयि खिद्यन्ति सुराङ्गनाः । लोके पुरुषाः स्त्रीभि र्मोहिता भवन्तु । किन्तु, एवंविध श्चक्षूरागोऽननुरूपः खल्वङ्गनाजनस्य । अत्रैव समुपविशामः । (सर्वा स्समुप- विशन्ति । वरूथिनी कञ्चित्कालं स्थित्वा समुपविशति)

रम्भा :- अये हरिणि ! किमपि मधुरं गीतम् ...

हरि :-अलम् । ज्ञायत एव । (एवं गायति द्विपदम्)

सुरराज पत्तने सुमनोधिवीथि ।
निरुपमानं रमणीय वेश्माऽस्ति ।
भाति तद्वेश्मनः पथि सरः किमपि ।
चेतोहरामृत शीकर वर्षि ।
सरसि तस्मिन् सरोजात मुल्लसति ।
सुरुचिर मकरन्द शोभि सुगन्धि ।
सारवत्पुष्परसं समापूर्य ।
हारिणि भाजने हाटके, चाप्य !
मञ्जुल वज्राळि महित माणिक्य-
पुञ्जाम्बुरुह रागपूरित दाम ।
त्रिनयन गिरितोऽवतीर्य शशाङ्क !
कनकाद्रि मवगाह्य कैरवमित्र !
ललितकला समलङ्कृत देह !
ललिताननाया गळे भूषयाशु ।
पाययैनां सुमबाण बाणौघ
दूयमानां ते विधो ! पुण्य मस्तु ॥

वरू :- हे कन्दर्प ! त्रिनयनरुषा भस्मशेषी कृतोऽपि
पत्न्या रत्या स्सुकृत वशतो निर्जरोज्जीवितस्सन् ।
लब्ध्वाऽनङ्ग प्रकृति मसकृत्, बाधसे काम ! पान्थान्
तन्माङ्गल्य प्रबल महिमा कीदृशो वा न जाने ॥

हा चन्द्रमः ! किं शीतकिरणोसि ?

विषमाशुग मित्रता वशात्
विषमाक्षस्य शिरस्स्थितेः पुनः
विषसोदर भाव संश्रयात्
विषमां मे कुरुषे दशा मिमाम् ॥

रम्भा :- (मधुकलश मानीय ददाति)

वरूथिनी :- (हस्तेन वारयन्ती अर्धं पीत्वा विसृजति)

हरिणी :- (पूगचूर्णसहितं ताम्बूलं ददाति)

वरू :- ताम्बूल मर्धं बहिः कृत्वा अनिच्छन्ती वाऽर्धं भुङ्क्ते)

ह :- (दिशः पश्यन्ती) शशिरेखे ! पश्य तद्दृश्यम् । (रम्भा मवलोकयन्ती)सा रम्भाफलिनी अपरिमितानुराग सुमनोऽरूसा किसलय बाहावल्लरीभि रतसी मालिङ्गति ।

शशि :- (नेत्रान्तेन रम्भा मवलोकयन्ती) युक्त मुक्तं त्वया । तापस मालिङ्गति खलु,....... अपरिमितानुराग सुमनोऽलसा रम्भा किसलय बाहा लतिकाभिः । (सर्वा रम्भा मवलोक्य प्रहसन्ति)

रम्भा :- वरूथिनि! सल्लाप व्यग्रामि रस्मामि विरह विरळस्ते कालोऽत्यूहितः । (तत स्समुत्तिष्ठति)

ह :- तेन तत्रावश्यंभाविना भाव्यम् ।

रम्भा :- तथैव तेन तत्रावश्यंभाविना एव भाव्यम् ।

इति तृतीयोऽङ्कः

चतुर्थोऽङ्कः

(नन्दनारामे रम्भा वरूथिनी मलङ्करोति)

(प्रवरवेष परिग्रहः कोऽपि गन्धर्वराजः, मर्गान्तरेण प्रविश्य, इतस्तत श्चरन् छोटिकां दत्वा ऊर्ध्वं मवलोक्य ... प्रकाशम्)

माया प्रवरः :- गन्धमादन निर्दिष्ट मुपवन मेतदेव खलु ! प्रथमतो न्यक्कृतोऽस्मि अनया । भवतु, अद्य सर्वप्रयत्नेनाऽपि मम रिरंसा सफला भूया देव । (ऊर्ध्वं मवलोक्य ध्यात्वा) आम् ! देवजातित्व जनित विमल ज्ञान पाटवेन सर्वोऽपि वरूथिनी वृत्तान्तो विदितोऽस्ति मयां । भवतु, ... तदिमा मवस्थितोऽस्मि खलु तस्याः केळीवनीं । सा सखीभि र्विनोद्य- माना नून मत्रैव भविष्यति । (इति इतस्ततो दत्तदृष्टि रवलोक्य, उपविश्य, उन्मीलित नयनोपि ध्यान मास्थितः क्षण मात्रं स्थित्वा सवेग मुत्थाय ... नमस्कुर्वन्) भगवन् कुसुमायुध !

पुष्पबाण ! शरां स्तीक्ष्णान्
मयि पातय तान् सहे ।
कृत्वा कुलिश कल्पां स्तान्
तस्यां पातय मोहय ॥

(क्षणं ध्यान मास्थितः सहर्षम्) आम् ! युज्यते । अहो ! मे भाग्यम् । सा खलु वरूथिनी मया प्रार्थिताऽपि मां तिरस्कृतवती··· स्वयं कमपि भूमिसुरं कामयमाना तेन धर्मभीरुणा छान्दसेन प्रत्याख्याता अस्मिन् विहारारामे विहरति वा ! स्त्रीणां चित्त प्रकृत्यैव चञ्चलम् ।

क्वचि त्तरुण्योऽभिभवन्ति कान्तम्
क्वचि त्तथाऽकान्त मभिद्रवन्ति ।
क्षणे क्षणे चापल मेति तासां
चित्तं सकाले पुरुषेण भोग्याः ॥

(दत्त कर्णः) मञ्जुल शिञ्जारव इव । (सामोदम्) अम्महो! प्रियसखी इत एवागच्छति । (ससम्भ्रमम्) प्रवरोचितवेष परिग्रहोऽस्तु मे । (आत्मान मवलोक्य, आत्मान मेव हस्तेन वारयन्)अधिगत एव खलु स वेषः । अस्तु तस्या नेत्रपथवर्ती भवामि ।
(पूजार्थं पुष्पापचये व्यग्र इव भवति)

वरू :- (उत्थाय समन्ता दवलोकयन्ती हठा त्तमवलोक्य रम्भा मुपेत्य पुन रवलोक्य तमेव पुन रागतं मत्वा कराग्रेण दर्शयन्ती) वयस्ये ! पश्य तन्निकुञ्जान्तरितं पुष्पाण्यपचिन्वानं पुरुषम् ।

(उभे किञ्चि द्दूरं गत्वा पश्यतः)

रम्भा :- व्रतार्थं मिव सौवर्णः कङ्कणः करे दृश्यते ।

वरू :- सम्य गुपलक्षितं त्वया । श्रूयताम् कम्पमानेन बिम्बाधरेण

विपञ्चीस्वरमयं जटापाठं च करोति । अहह...(इति तदेक दृष्टिः) कमलायेते खलु तल्लोचने ! दिशामार्गान्वेषिणी दीर्घलोचनदीप्ति स्तोरणमालिका मावध्नातीव । ... अहो ! कमनीय तनु कान्तिमतः कनक द्रवेणास्य शरीरस्य सर्वोऽप्यय मारामरङ्गो हिरण्मयीकृत इव । सखि ! पश्य पश्य । आनितम्बं विलम्बमानं विनील कच ग्रन्थिम् । (किञ्चिदिवा लोच्य, रम्भा मवलोक्य) हला ! केन वा तेन भवितव्यम् ?

रम्भा :- न भवितव्यम् केनाप्यन्येन । निकटं गच्छ । सखीमि रह मप्यागमिष्यामि । (सा परावर्तते)

मा. प्र. :- (शब्दं निरूप्य) हन्त ! कल कण त्कनक काञ्चिका सा कामिनी मामेवाभ्यागच्छतीव । भवतु, तां नैव वीक्षे ।

वरू :- (आत्मगतम्,) किमयं स्वप्नो नु ? उताहो ! माया । स्वप्नसुख मनुभूयत इव । (त मुपेत्य प्रकाशं सगद्गदम्) हन्त कान्त ! वक्तु मशक्ता । (विलास मभिनयन्ती तस्य, उत्तरीयाग्रभाग-मंगुलिना चालयन्ती (धैर्यं लब्ध्वा) प्राणसख ! पुरुषाणा मवहित्था सहजा किमु ?

मा. प्र. :- (किञ्चि दुच्चलितः, ओष्ठौ विवृत्य साश्चर्यम् ।) कथ मवहित्थेति ? (इत्यात्मान मवलोकयति)

वरू :- (स्मयमाना) श्रोत्रिय ब्राह्मण ! प्रथम मनादृतास्मि खलु ! त्वया ।

मा॰ प्र॰ :- (सशिरः कम्पम्) विदित मासी द्वेदितव्यम् ।


वरू :- लालस ! मत्सरा द्विरम, लालय बाल रसाल मालती
जाल तले, शशाङ्क कर जाल वृते, मदनाकुलाश्रुभिः
हालितयामिनीप्रहर मत्यगमं मदनाग्नितापिता
हा ! ललिताङ्गलक्ष्य हृदया खलु ते करमाश्रिताऽधुना ।

मा॰ प्र॰ :- (आत्मगतम्) कुहनामूप्तुरोऽह मेनां वञ्चयामि खलु ! भवतु, धार्मिक इव नाटयिष्यामि । (इति स्पृशन्ती मपि ता मस्पृशन् ।) अयि फुल्लाम्भोरुहनेत्रे ! वृद्धौ पितरौ मामपश्यन्तौ क्षणमपि न भविष्यतः । साध्वी गृहिणी मद्विरहं क्षणकाल मपि न सहते । सवन वह्नि श्रेणि रपहुतेव भविष्यति । मन्दिरं च यजमानेन विना शून्य मेव खलु ! ईदृश्या मवस्थायां कथंवाऽहं भोगलालसो भवामीति डोलायते मम मनः । (किञ्चि दिवालोच्य) तवाय माशयोऽपि विचार्य एव ।

वरू :- (सावष्टम्भम्) विचार्यतां विशेषेण ।

मा॰ प्र॰ :- (सस्पृहम्)

हे सरसीरुहाक्षि ! भवदीय्य महो परिरम्भणादिकं
नो सुरभर्तु रप्यहह ! नो प्रभवेति विहातु मस्मि स
न्न्यासिजनः कि ? मात्महृदयं नहि वाञ्छति केकिका घना
श्वासितदुःखिते मनसि सर्वमसह्य मिदं न वेत्सि किम् ?



(क्षणं शिर उन्नमय्य आलोच्य) प्रिये ! यद्भाव्यं तद्भवतु इति परित्यक्तव्रतो भवामि । किं बहुना !

दीनाननं ते समवेक्ष्य कान्ते !
व्रतं परित्यज्य भवामि रक्तः ।
उपेक्षणीया ननु रप्यवश्यं ।
परोपकाराय हि कल्पते चेत् ॥

अये प्रेयसि! अस्ति कश्चित् ज्ञेयः अस्मद्देशाचारः । किमिति चेत् याव दावां सुख मनुभवावः तावत् त्वया निमीलित नेत्रया एव भाव्यम् । तदा नेत्रोन्मीलन मघाय भवतीति अस्मन्मत सिद्धान्तः ।

वरू :- अपूर्वोऽयं खलु राद्धान्तः ।

मा॰ प्र॰ :- यदि त्व मेनां मर्यादां नाङ्गीकरोषि, अह मस्मद्भूमिं गन्तुं नैव शक्नोमि खलु! तदा अयि भामे ! अत्र मन्दाकिनी तीरे एभि र्मुनिभि रस्मिन्नेव वृक्षवाटे हा विधे ! अब्रह्मण्य मब्रह्मण्य मिति तपः किंवा करिष्यामि । प्रिये! पूर्णेन्दुवदने ! व्रते भ्रष्टे, अथवा सौख्य मनुभवनीयम् । तंदात्वं स्ते बाहु लतापाशे बधान माम् । (तथा कर्तु मुद्युक्ते तस्मिन् पश्चाद्गत्वा)

वरू :- गीतम् ॥ भूमिसुरेन्दो ! मनसा याचे ।
भवसि सखे ! सहवासी
सेवेऽहं त्वां सुरतरु दत्त

विभूषण तति युत भोगम् ।
क्षितिसुर ! लीये तव वर रूपे
कलित मनोहर भावा....
न कुरु विलम्बन मनिश मलङ्कुरु
तव हृदि मां हृदयेशाम्
यक्ष कुमारा दपि नव ! सुन्दर !
कामयते मनसेयम् ।
अल मयते ननु हे विधु सुन्दर !
मनसि पिहित मधुमूर्तिम् ।
ननु सुमवाण स्संहृत वाणो
गच्छति मत्र दुपयाने ।
सरसिज नयनं सुरुचिर वसनम्
पश्यति तव सद्रूपम् ॥

मा॰ प्र॰ :- अहो ! गेयस्य मधुरिमा । (वरूथिनीप्रवरौ मिथोगायतः)

गीतम्- वरू :- सुन्दर ! याचे प्रणयं हि ते ।
रस सागर हृदयाद्धु रनिशं भवेः ।

मा॰ प्र॰ :- सुन्दरि ! कलये प्रणये तव ।
कलगायनि ! त्वायेऽह मसमेषुतः ।

वरू :- मन्मनीषित सुररीकुरु त्वम् ।

मा॰ प्र॰ :- लियते त्वयि जन एष रागी ।

वरू :- लोक एवानन्द सीमा ।



मा॰ प्र॰ :- तोष माप्नुहि मनसा भजामि ....
सुन्दरि ! ... कलये ...

वरू :- शशी दिवैवोदयते रसाब्धा ।
वलं विचार्याल मळीक हासैः ।

मा॰ प्र॰ :- अच्छोदके ते कमनीय मास्यम् ।
पोप्लूयते पूर्णशशीव कान्ते !

उभौ :- अद्यैव नो मधुरो वसन्तो
प्यशिथिलो मृदु प्रणयानुबन्धः ।
आलाप रम्यं भ्वानन्द गीतम् ।
कर्णातिथि श्चेन्मधुरं मधुरम् ।

(निकुञ्जे निलीय सर्वं दृष्टवत्यो रम्भा हरिणी तिलोत्तमा शशिरेखा बहि रागच्छन्ति ।)

रम्भा :- (साकूतम्) द्विजराज ! नवनीत हृदया द्विजा इति वचः, अयथार्थं ननु ?

ह :- (वरूथिनीं प्रति) सखि ! दिष्ट्या वर्धसे । (ब्राह्मणं प्रति सासूयम्) ब्राह्मण ! भवान् विवेकी ननु ?

तिलो :- (साभिप्रायं सशिरःकम्पम्) हन्त ! असाधु रसि तरुण-ब्राह्मण !

रम्भा :- (हस्तेन दर्शयन्ती) सखे ! अयं प्रदेशो मृगनाभि निकरस्य निवासः ।

हं :- प्राणमित्र ! जिघ्राऽत्र गन्धवहं वकुळवाटी गन्धवहं कर्पूरतरु पराग मसृणम् ।

शशि:- कामरूप! वीक्षस्वात्र, सहकार शाखा किसलयरागं तिरस्कृत सन्ध्यारागम् ।

रम्भा :- (तावत् शकुन्तानां कलकलं श्रुत्वा) कैतव कुसुमशरासन ! अङ्गभव विद्यापारगो भवानागच्छतीति शारिका अनङ्ग शास्त्राभ्यसनं कुर्वन्ति, कीरका वदन्ति स्वागतम् । (निकटस्थम् कमपि लवली निकुञ्ज मवलोक्य जनान्तिकम्) तरुणि हरिणि ! प्रवेशय प्रेयसीप्रियौ । (नेत्रसंज्ञां करोति ((तावदेव नेपथ्ये) अयि चक्रवाकि ! अचिरेणैव प्रिय आगमिष्यति । माऽस्तु विरह कातरता । (सर्वाः शृण्वन्ति)

ह :- रम्भे ! ते कृतक पुत्रकः प्रियां विहाय विहायस मुड्डयते किल ! तदागच्छन्तु सख्यः ! तौ संयोजयामः ।

वरू :- (सलज्जम्) नन्वह मेकाकिनी । (गन्तु मिच्छति ताभिः)

रम्भा :- नुन मेकाकिनी नैव । (सर्वा परिक्रामन्ति)

मा॰ प्र॰ :- तवोपासिता जनः ....

(हस्तं ग्रहीतु मिच्छति । तावद्यवनिका पतति)

इति प्रथमो रङ्गः

——



द्वितीयो रङ्गः

मा॰ प्र. :- (इतस्ततो पादचारी क्षणं स्थित्वा) प्रियसखी, अन्तर्वत्नीव। तान्येव लक्षणानि लक्ष्यन्ते खल्वस्याम्। आहार मरुचिं मनुते। गमने च अलसेव। निस्संशयं कुरङ्गनयना गर्भश्रान्ता। (किञ्चि दिवालोच्य) सा यदि मां कुहना मूसुरं ज्ञास्यति...ततः किं भविष्यति? (मुष्टिं कृत्वा) विरह कातरेण प्रेम्णा मां शप्स्यति... अथवा पञ्चत्वं प्राप्स्यति। (तावत् गर्भश्रान्ता वरूथिनी मञ्जुल शिञ्जारवेणागमनं सूचयन्ती शनैश्शनै रागच्छति) (मायाप्रवरस्ता मभिगम्य तदंस भागे दत्तहस्तः आनीय कस्मिंश्चित् हलक तल्पाभोगे तया सह क्षणमात्र मुपविश्य पुनः उत्थितः चरन् आत्मगतम्) कथ मपि एनां प्रियवचनै र्लालयित्वा अतो निर्गमिष्यामि। (प्रकाशम्) प्रिये! यः खलु महायोगी अमूल्यं पादलेपं मह्य मदात् यत्प्रभावेण त्वत्सङ्गमसुख मन्वभवं, सः अद्य गिरि-तटे दृष्टः मया पृष्टश्च एव मब्रवीत्।

वरू :- किमिति?

मा॰ प्र॰ :- अतिक्रान्तः किल अस्मद्ग्रामः मार्ग मध्ये। सस्य श्यामलं मम क्षेत्र मनवेक्षितं सत् शुष्कीभूतं किल। वटवः प्राड्विवाकाः वञ्चयन्ति किल गुरून्। (सविषादम्) बत! कष्टतर मिदम्। अधमर्णाः गृहीतं धनं समये नैव प्रत्यर्पयन्ति किल। ... यानि ग्रहणवेलासु राजभवनेषु लभ्यन्ते,

उपायनानि दूरिभूते मयि तान्यपि दूरीभवन्ति खलु ! तथाहि ! विना गृहमेथिना गृहाः नैव शोभन्ते । अयि कमलनयने ! मच्चिन्तया मामेव चिन्तयन्ति किंलास्माकीना स्सर्वेपि । त्वं खल्वसि धर्माधर्मावस्थितिज्ञा । (क्षणं स्थित्वा) प्रिये ! निस्सीमानः खलु भोगाः । (शिर उन्नमय्य किञ्चि दिवालोच्य ।) अयि ! विश्वसिहि मम वचनम् । त्वं मयि मोहवती ।

वरू :- भवान् मयि अनुरागवान् खलु !

मा॰ प्र॰ :- अथ किम् ! आवयो रनुरागः अन्योन्य मनतिरिक्तः ।

वरू :- तर्हि गृहान् प्रति अप्रस्थिते त्वयि ।

(दुःखावेगेन जातबाष्पा तिष्ठति)

मा. प्र :- (चुबुक मुन्नमय्य) अयि भीरू: ! ... कथं बाष्पदिग्धं नयनम् । न खलु देवजातिः दुःखैः दूयते । बाष्पधारासिक्ता कुरङ्ग मदचर्चा धारापातं द्रवति ।

(मुख मुन्नमय्य, अश्रूणि निवारयन्)

त्वमसि धीरस्वान्ता दिव्याङ्गना कोविदा च । निगृह्यतां मोहः। योगवियोगौ सहजौ। भव्यानि भवन्त्येव। प्रियजनानां यातायाते अनिवार्ये खलु ! (आसनान्तर मधिगतः) प्रिये शुककलालापे! सः योगी मया प्रार्थितः यथेष्टं विहर्तुं विहङ्गम शक्ति मह्यं दत्तवान् । तदहं जीवितेनैव शपामि ते । (उत्थाय हस्तं गृहीत्वा) प्रणयिनि! स्वच्छन्द गति रह मचिरेणैवाऽत्र भवि-

ष्यामि । सर्वास्ववस्थासु मम मनस्त्वय्येव स्निह्यति । तत्, व्रज देळीवनम् । ततोऽह मुत्पतिष्यामि मे पन्थानम् ।

(तया सह निष्क्रामति)

इति द्वितीयो रङ्गः

तृतीयो रङ्गः

(जैमिनिमुने राश्रमः । प्राङ्गणे उपविश्य ग्रहगतिं गणयन् तिष्ठति । तावत् शिष्यः कात्यायन आगत्य अभिवाद्य उपविशति)

रम्भा :- (प्रविश्य जैमिनिं प्रति) भगवन् ! रम्भाऽह मभिवादये । (तथा कृत्वा) प्रियसखी वरूथिनी प्रसववेदना मनुभवति । अप्यनुकूला ग्रहसम्पत् ?

जैमिनिः :- वत्स ! कात्यायन ! गणय ग्रह सम्पत्तिम् (इति स्वय मपि तथा कृत्वा) अहो ! भागधेयवती वत्सा वरूथिनी । नूनं ...... पुत्रवती...

ह :- (प्रविश्य उच्चैः) हला रम्भे ! पुत्रं प्रसूतवती प्रियसखी ।

रम्भा :- (सस्नेहहासम्) सखि ! आनन्दवार्तावाहिनि ! गाढ मालिङ्ग । (हरिणी तथा करोति)

कात्यायनः :- अहो ! ग्रहाणा मनुग्रहः । (गणयन् उर्ध्व मवलोकयति)

जैमिनिः :- आश्चर्यम् । शिशु रय मब्जभवाण्ड गेहस्य दीपाङ्कुरो भविष्यति । किं बहुना ! ग्रहपञ्चकं रविणा, असङ्गत मनस्तं गतं च ।

इ :- शिशु र्नाम न केवलं शिशुः । प्रवर देह समिद्ध शिखि दीप्तः कुल दीप एव ।

जैमिनिः :- (ऊर्ध्व मवलोक्य पुन र्गणयित्वा, साश्चर्यम्) स्वरुचि स्फूर्त्या शिशु रयं शशि भास्कर पावकानां प्रकाशमपि प्रच्छादयिष्यति । तदस्य नाम 'स्वरोचि' रित्युचितं भवति ।

रम्भा :- अनुगृहीताः स्मः ।

जैमिनिः :- उच्यतां मद्वचनेन वत्सा वरूथिनी ...

वत्से वरूथिनि ! ... यथाकालोपनीतः ते सुतः निगमार्थ वेदी सभासु निगदिष्यति । धनुर्वेदे विशारदः अस्त्र विद्याया मद्वितीयश्च भविष्यति । किं बहुना !

अयं निर्मल कान्ति विलास रेखाभिः सर्व व्यापको विहरिष्यति ।

रम्भा :- अतः परं किमपि प्रिय मालपिष्यामि । तदेवमस्तु ।

भरतवाक्यम्

प्रजास्वाम्य प्रभुत्वेऽस्मिन् । प्रजाना मस्तु सुस्थितिः
सत्याहिंसा द्विधारासिः । मन्त्रिसिंहः प्रशास्तु नः ॥

इति शम् ।

EPILOGUE

In this great seat of democracy may the lives of the people be happy and prosperous.

May our beloved Prime Minister win many more laurels of Victory, wielding the double-edged weapon of Truth and Love.

(२७ पृष्ठ गतस्य द्विपदस्य पाठान्तरम्)



वृन्दारकावनौ – अमरेन्द्र नगरी
नगरी चतुष्पथे – सरसी मनोहरी
हार्यन्तराळे – रुचिरं हि हर्म्यम्
हर्म्याङ्गणे भाति – जलजं सुरम्यम्
रम्याम्बुज स्त्रावि – मकरन्द सारम्
सारङ्ग रम्याङ्क ! – मधुमत् सुसारम्
सौवर्ण रोचने – नवरत्न योजने
राजन् समापूर्य – रजतस्य भाजने
रजताद्रि मवरुह्य – सहसा हिमांशो !
हेमाद्रि मारुह्य – तरसा सुधांशो !
सौधाम्बु सिक्तया – शशिकान्त मालया
म्लानाननाया – गळ सीम भूषय
भूषा दिशन् भो ! – मधु पाययैनाम्
मीनाङ्क बाणात् – अव पुण्य मस्तु ॥

*

English rendering of the song

'Brundarakavanou'



In Heaven, in Indra's capital
At the cross-ways there is a beautiful pond
In the middle of the pond there is a mansion fine
In front of the mansion there is a lotus
From that lotus flows a stream nectarine
O Moon ! fill the golden cup bedecked with gems,
with drops of honey-dew divine
Come quickly, sailing through the silver sky
Scale quickly the mountain golden
Come bringing a garland cool and splendid
To grace our maiden's faded charms
Deck her with jewels rare
From Love's darts save and spare !
With your delicious cup slake her thirst
Eternal splendours round you burst !

—*Amarendr*

(An invocation to the Moon based upon a folk-song popular in Andhra Pradesh)


अनुसन्धान
तिथी
